# संस्कृतवार्ता:

दिनाङ्क :- 29/03/2025 सायम् - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- राष्ट्रपतिपदासीनया द्रौपदीमुर्मू इत्यनया पर्यावरणं प्रति जागरूकतायै संवेदनशीला जीवनशैली स्वीकरणीयेति सबलं प्रतिपादितम्।
- छत्तीसगढ़स्य सुकमाजनपदे सुरक्षाबलैस्सह सङ्घर्षे न्यूनातिन्यूनं सप्तदश माओवादिनः मारिताः।
- इसरो इत्यनेन स्वकीये त्रिशत मिली न्यूटन स्टेशनरी प्लाज्मा थ्रस्टर इत्यस्मिन् सहस्रहोरायाः जीवन-परीक्षणस्य सफलसमापनस्य घोषणा कृता।
- म्यांमारदेशे भूकंपीयदुर्घटनायां मृतकानां संख्या सहस्राधिका जातास्ति; भारतेन भूकम्प-प्रभावित-देशाय मानवीय-सहायता सम्प्रेषिता।
- आईपीएल क्रिकेटमालिकायां, गुजरात टाइटन्स दलस्य सङ्घर्षः अद्य सन्ध्यायां अहमदाबादनगरे मुंबई इंडियंस - दलेन सह भविता।

-------------------------------------------

राष्ट्रपतिः पर्यावरणम्

राष्ट्रपतिपदासीनया द्रौपदीमुर्मु इत्यनया उक्तं यत् जागरूकताधारितया निरन्तरसक्रियतया च समेषां सामूहिकप्रयासैः एव पर्यावरणस्य संरक्षणम् तस्य सम्वर्धनञ्च सम्भवमस्तीति। राष्ट्रपतिना नवदिल्ल्याः विज्ञानभवने राष्ट्रिय- पर्यावरण- सम्मेलनस्य उद्घाटनं कुर्वत्या इदमुक्तम्। राष्ट्रिय- हरिताधिकरणेन द्विदिवसीयस्यास्य सम्मेलनस्य आयोजनं कृतमस्ति। राष्ट्रपतिना उक्तं यत् भाविसन्ततिभ्यः स्वच्छ- वातावरणं न्यासत्वेन दानम् अस्माकं कर्तव्यमस्ति।

राष्ट्रपतिना पर्यावरणस्य संरक्षणाय पर्यावरणानुकूला सम्वेदनशीला च जीवनशैली स्वीकरणीया इति प्रतिपादिता। अवसरेऽस्मिन् केन्द्रीय- पर्यावरण- मन्त्रिणा भूपेन्द्रयादवेन उक्तं यत् भारतं

न्यून- कार्बन युतायां प्रौद्योगिक्यां – नवचारस्य वर्धापनदिशि एकाग्रमस्ति। तनोक्तं यत् भारतं विश्वस्मिन् ऊर्जोत्पादनक्षेत्रे तृतीयं बृहत्तमं राष्ट्रमस्तीति।

---------------------------------------------

छत्तीसगढ- नक्सलवादिनः

छत्तीसगढराज्ये बस्तरसम्भागस्य सुकमा- जनपदेऽद्य सुरक्षाबलैस्साकं जाते एकस्मिन् सङ्घर्षे सप्तदशसङ्ख्यकाः नक्सलवादिनः व्यापादिताः। अस्माकं वार्ताहरः सूचितवान् यत् एतस्मिन् सङ्घर्षे जनपदारक्षितारक्षिबलस्य सैनिकद्वयमपि व्रणितम् अभवत्। व्यापादितेभ्यः नक्सलवादिभ्यः अनेकप्रकारकाणि शस्त्रास्त्राणि आरक्षिभिः समधिगतानीति वार्ताहरैस्सूचितम्। प्रकरणेऽस्मिन् वदता गृहमन्त्रिणा अमितशाहेन स्पष्टीकृतम् यत् प्रधानमन्त्रिणः श्रीनरेन्द्रमोदिनः नेतृत्वे नक्सलवादस्य शमनाय आगामिनः वर्षस्य मार्चमासान्तं यावत् कालः निर्धारितोऽस्तीति।

---------------------------------------------

म्यांमारभूकम्पः

म्यांमार-देशे भूकम्पेन पीडितानां संख्या सहस्राधिका जाता। ह्यः दुरापन्नायां दुर्घटनायां यत्र भूकम्पस्य रिक्टर- स्केल इति स्तरीयः परिमापः सप्त दशमलव- सप्त आसीत्। सैन्यनेतृत्वयुतेन प्रशासनेन स्वकीये वक्तव्ये उक्तं यत् द्वयधिकैकसहस्रजनाः मृताः लब्धाः। षट्सप्तत्यधिक त्रिशतोत्तर द्विसहस्रजनाः व्रणिताः सन्ति। अधिकांशतया जनहानिः भूकम्पकेन्द्रस्य निकटवर्तिनि नगरे माण्डले इत्यत्र अजायत्। भारतीयसहायता - म्यांमारः

भारतेन ह्यः आगतभूकम्पादनन्तरं म्यान्मारदेशं प्रति प्रायः पञ्चदश टनमिता साहाय्योद्धार-सामग्री प्रेषिता। अभियानमिदम्- ऑपरेशन- ब्रह्मेति संज्ञकमस्ति। भारतीयवायुसेनायाः विमानं हिण्डन् वायुसेना-विमानपत्तन-स्थानकात् सहायताम् प्रेषितवत्। साहाय्योद्धार-सामग्रीषु अस्थाई- निवास- शयनपुट- कम्बल- भोजन- जनरेटर् सेट् इति विद्युदुत्पादन-यन्त्रादीनि आवश्यकवस्तूनि च सन्ति। तदतिरिक्तं आपत्प्रभावितानां जनानां कृते महत्त्वपूर्ण-चिकित्सा-सामग्र्यः अपि प्रेष्यन्ते। म्यांमारदेशस्थः भारतीय- दूतावासः सक्रियतया अस्यां दुर्घटनायां दृष्टिं ददन्नस्ति। प्रधानमन्त्रिणा नरेन्द्र मोदिनाऽपि तत्रस्थेन वरिष्ठाधिकारिणा जनरल मिन औंग ह्लैंग इत्यनेन सह सम्वादो विहितः।

---------------------------------------------

‘मन की बात’-कार्यक्रम:

प्रधानमन्त्री नरेन्द्रमोदी श्वः एकादशवादने स्वीये ‘मन की बात’ इत्येतस्मिन् कार्यक्रमे देशवासिभिः साकं विचार-विनिमयं करिष्यति। ‘मन की बात’ इत्यस्य मासिक-कार्यक्रमस्य इदं विंशत्यधिककैकशततमं संस्करणं भविष्यति। अस्य कार्यक्रमस्य प्रसारणम् आकाशवाणी-दूरदर्शनयो: सर्वाभिः वाहिनीभिः भविष्यति। अयं कार्यक्रमः आकाशवाणी-दूरदर्शन-प्रधानमन्त्री-कार्यालय-सूचनाप्रसारण-मन्त्रालयानां यूट्यूब-वाहिनीष्वपि द्रष्टुं शक्यते। प्रधानमन्त्रिणः सम्बोधनानन्तरम् अयं कार्यक्रमः क्षेत्रीय-भाषासु अपि प्रसारयिष्यते।

---------------------------------------------

इसरो- निरीक्षणम्

भारतीयान्तरिक्षानुसन्धान-सङ्घटनेन इसरो इत्येतेन त्रि-शत- मिली- न्यूटन- स्टेशनरी- प्लाज्मा- थ्रस्टर इत्येतस्मिन् एकसहस्र- होरानां जीवन- परीक्षणस्य सफलसमापनं समुद्घोषितम्। अनेन परीक्षणेन उपग्रहाणां वैद्युत्कीयप्रणोदन-प्रणाल्यां सम्मेलने सरलता भविष्यति। इसरो इत्यनुसारं इदं जीवनपरीक्षणं पञ्च दशमलव चत्वारि- किलोवॉटपरिमितस्य पूर्ण-शक्ति – स्तरे एकस्मिन् कक्षे कृतमासीत् यद्धि अन्तरिक्षस्य निर्वात- स्थितिनाम् अनुकरणं करोतीति अथ च इलेक्ट्रोट- लाइनर्स- इत्येतस्य क्षरणस्य प्रतिसमयं निरीक्षणं भवति स्म। एतदतिरिच्य सङ्घटनम् प्रोक्तवत् यत् एतादृशी योजना उपग्रहस्य कक्षाप्रबन्धने महत्वपूर्ण- भूमिकां निभालयिष्यति।

---------------------------------------------

नड्डाःबिहारदिवसः

भारतीयजनतापार्टीतिदलस्य राष्ट्रियाध्यक्षः जेपीनड्डाः अद्य दिल्लीप्रदेशीयेन भाजपेतिदलेन आयोजिते बिहारदिवस- समारोहे सहभागं कृतवान्। एतस्मिन् समारोहे दिल्लीप्रदेशीयः भाजपेतिदलाध्यक्षः वीरेन्द्रसचदेवाः पूर्वाञ्चल-मोर्चा दलस्य नेतारः भाजपेतिदलीयाः सांसदाः विधायकाः च उपस्थिताः समभवन्। स्वकीये अभिभाषणे श्रीनड्डाः न्यगादयत् यत् बिहारराज्ये एनडीए प्रशासनेन जनानां हिताय अनेकानि विकासकार्याणि सम्पादितानि। असौ अग्रे प्रावोचत् यत् राज्यस्यास्य विभिन्नेषु जनपदेषु चिकित्सकीय- महाविद्यालयाः निर्मीयन्ते। एवञ्च राज्यस्य प्रशंसां कुर्वन् उक्तवान् यत् महात्मागांधीवर्यस्य सत्याग्रहः जयप्रकाशनारायणवर्यस्य विविधानि देशहितकार्याचरणानि अभियानान्यापि बिहार- प्रदेशादेव समारब्धानि।

---------------------------------------------

पीयूषगोयलः

वाणिज्योद्योगमन्त्री पीयूषगोयलः सुदृढायाः मध्यस्थता-प्रणाल्याः आवश्यकतायां बलम् अददात्। श्रीगोयलेन प्रोक्तं यत् मध्यस्थतेति प्रणाली न्यायिक- विलम्बस्य न्यूनीकरणदिशि उपयुक्तां भवितुं शक्नोतीति। तेनाद्य यूनियन- इण्टरनेशनल- डेस- एड्वोकेट्स – यू आई- ए (UIA) इति सम्मेलने भारतम् नूतनं वैश्विकविनिर्माणकेन्द्रमिति सत्रावधौ उक्तम्। तेनोक्तं न्यायालयानां मुक्तस्थापनेन भारतस्य वैश्विक- विनिर्माण- केन्द्रम् वृद्धिमवाप्स्यतीति। प्रसङ्गेऽस्मिन् भाषमाणेन श्रीगोयलेन प्रतिपादितं यत् सम्प्रति राष्ट्रियजनानां मध्यायुः त्रिमासोत्तर- अष्टाविंशति- वर्षाणि अस्ति। अनेन सिद्ध्यति यत् अन्येषा राष्ट्राणां तुलनायां भारतं युव- राष्ट्रमस्तीत्यपि तेनोक्तम्।

---------------------------------------------

क्रिकेटक्रीडावर्तासु

आईपीएल क्रिकेटस्पर्धामालिकायाम् अद्य सन्ध्यायां अहमदाबादनगरे गुजरातटाइटन्स दलस्य साम्मुख्यं मुम्बई-इण्डियन्स् दलेन सह भविष्यति। ह्यः क्रीडितायां क्रिकेटस्पर्धायां चेन्नई-सुपर-किंग्स दलम् रायल-चैलेन्जर्स बैंग्लोर दलेन पराजितम्।

।। इति वार्ता:।।